## इयत्ता दहावीच्या प्रस्तावित आराखड्यानुसार कृतिपत्रिका क्र – १

समयः – होरात्रयम् गुणाङ्काः – १००

### प्रथमः विभागः – सुगमसंस्कृतम् (१५)

१) अ) चित्रं दृष्ट्वा नामानि लिखत। (५ तः ४) ४

१. 

२. 
३. 
४. 
५. 

आ) सङ्ख्याः अक्षरैः/अङ्कैः लिखत। (३ तः २) २

१. ९७ = ............... २. त्रिचत्वारिंशत् = ......... ३. अष्टाशीतिः = ...........

इ) समय–स्तम्भमेलनं कुरुत। २

| अ | आ |
|---|---|
| १. त्रिवादनम् | ४.०५ |
| २. पञ्चाधिक–चतुर्वादनम् | ७.३० |
| ३. सार्ध–सप्तवादनम् | १०.४५ |
| ४. पादोन–एकादशवादनम् | ३.०० |

ई) वासर–तालिकां पूरयत। (३ तः २) २

परह्यः रविवासरः ← ह्यः ....... ← ......... मङ्गलवासरः → श्वः ......

उ) उदाहरणद्वयं लिखत। (६ तः ५) ५

१. तालव्यौ
२. ह्रस्वस्वरौ
३. तकारान्तस्य नामद्वयम्
४. पुंलिङ्गस्य नामद्वयम्
५. प्रथमगणस्य धातुद्वयम्
६. आत्मनेपदस्य धातुद्वयम्

### द्वितीयः विभागः – गद्यम्। (२२)

२) अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत। ७

किञ्चित्कालानन्तरं शृगालः मृगम् अवदत्, 'वनेऽस्मिन् एकं सस्यपूर्णक्षेत्रमस्ति। दर्शयामि त्वाम्।' तथा कृते मृगः प्रत्यहं तत्र गत्वा सस्यम् अखादत्। तद् दृष्ट्वा एकस्मिन् दिने क्षेत्रपतिना पाशः योजितः। तत्रागतः मृगः पाशैर्बद्धः। सः अचिन्तयत्, "इदानीं मित्राण्येव शरणं मम।" दूरात् तत् पश्यन् जम्बूकः मनसि आनन्दितः। सोऽचिन्तयत्, "फलितं मे मनोरथम्। इदानीं प्रभूतं भोजनं प्राप्स्यामि।" मृगस्तं दृष्ट्वा **अब्रवीत्**, "मित्र, छिन्धि तावन्मम बन्धनम्। त्रायस्व माम्।" जम्बूको दूरादेवावदत्, "मित्र, दृढोऽयं बन्धः। स्नायुनिर्मितान् पाशानेतान् कथं वा व्रतदिवसे स्पृशामि?" इत्युक्त्वा सः समीपमेव वृक्षस्य पृष्ठतः निभृतं स्थितः।

प्रदोषकाले मृगमन्विष्यन् काकस्तत्रोपस्थितः। मृगं तथाविधं दृष्ट्वा स **उवाच**, "सखे! किमेतत्?" मृगेणोक्तम्, "सुहृद्वाक्यस्य अनादरात् बद्धोऽहम्। उक्तं च –

सुहृदां हितकामानां यः शृणोति न भाषितम्।
विपत् सन्निहिता तस्य स नरः शत्रुनन्दनः॥"

काकः **अब्रूत**, "स वञ्चकः क्वास्ते?" मृगेणोक्तम्, "मन्मांसार्थी तिष्ठत्यत्रैव।" काकः उक्तवान्, "उपायस्तावत् चिन्तनीयः।"

१. **अवबोधनम् । (४ तः ३)** ३

क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।

जम्बूकः मनसि आनन्दितः, यतः ................

१. मृगः पाशैः बद्धः ।

२. जम्बूकस्य अन्येन सह मित्रता अभवत् ।

ख) कः कं वदति ?

''सः वञ्चकः क्वास्ते ?''

ग) पूर्णवाक्येन उत्तरं लिखत ।

क्षुद्रबुद्धिः कुत्र निभृतं स्थितः ?

घ) वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत ।

मृगेणोक्तम्, ''मन्मांसार्थी तिष्ठत्यत्रैव ।''

२. **शब्दज्ञानम् । (३ तः २)** २

क) गद्यांशात्२ पूर्वकालवाचक-धातुसाधित-त्वान्त-अव्ययं चित्वा लिखत ।

ख) प्रश्ननिर्माणं कुरुत ।

वने एकं सस्यपूर्णक्षेत्रमस्ति।

ग) उत्तरपदं लिखत ।

१. मृगस्तम् = मृगः + ........ ।

२. बद्धोऽहम् = बद्धः + ......... ।

३. **पृथक्करणम् । क्रमेण योजयत ।** २

१. क्षेत्रपतिना पाशयोजनम् ।

२. मृगस्य पाशबन्धनम् ।

३. मृगस्य सस्यखादनम् ।

४. मृगस्य प्रत्यहं क्षेत्रं गमनम् ।

आ) **गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।** ७

महोदया – अहो आश्चर्यम्! तन्त्रज्ञानसंस्थायाम्? संस्कृतस्य अध्ययनम् ?

महोदयः – महाविद्यालये संस्कृताध्ययनं केवलं कलाशाखायाः छात्राः कुर्वन्ति इत्यासीत् मे मतिः ।

समीरः – तिष्ठतु तावत् । तर्हि अवश्यं मेलयामि मे मित्राणि । एते सर्वेऽपि परिषदि सहभागिनः ।

प्रसादः – (अग्रे आगत्य) नमस्ते । अहं रसायनशास्त्रस्य छात्रः । प्राचीनभारतीयरसायनशास्त्रम् इति मम संशोधनक्षेत्रम् । तद्विषयकाः ग्रन्थाः संस्कृतभाषया लिखिताः । शालायां यद् संस्कृताध्ययनं कृतं तस्य उपयुक्तताम् अहम् अधुना अवगच्छामि ।

लीना – अहमपि भाषाशास्त्रम् अधीत्य बेङ्गलुरू इत्यत्र सॉफ्टवेअर-क्षेत्रे भारतीयभाषाविश्लेषिकारूपेण कार्यं करोमि । संस्कृतस्य ज्ञानम् आधुनिकभारतीय-भाषाणां विश्लेषणे अतीव साहाय्यकरं भवति इति मे अनुभवः ।

तनुजा – पार्श्वनिवेदनम् इति मे व्यवसायः । संस्कृतश्लोकादीनां पठनेन शब्दोच्चारणस्य उत्तमः अभ्यासः भवति। तेन अभिनये निवेदने च प्रभावः वर्धते । साम्प्रतं कलाक्षेत्रे कार्यरताः अस्मासु केचन भरतमुनेः नाट्यशास्त्रस्य अध्ययनं कुर्वन्ति ।

समीरः – भोः, भारतीयविद्यायाः नाम भारतीयतत्त्वज्ञान-योगशास्त्र-इतिहास- स्थापत्यादिशास्त्राणाम् अध्ययनाय विदेशेष्वपि नैके जनाः उत्सुकाः । तदर्थं काञ्चन दूरचित्रवाहिन्यः अपि सन्ति । तत्र संस्कृततज्ज्ञानाम् आवश्यकता वर्तते । मम सुहृद् आशयसम्पादकरूपेण तत्र कार्यरतः ।

**१. अवबोधनम् । (४ तः ३)** ३

क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।

१. एते सर्वेऽपि ............ सहभागिनः । (परिषदि / कार्यशालायां)

२. केचन ........... नाट्यशास्त्रस्य अध्ययनं कुर्वन्ति । (वाल्मीकेः / भरतमुनेः)

ख) वाक्यं पुनर्लिखित्वा सत्यम् / असत्यम् इति लिखत ।

गीतस्य पठनेन शब्दोच्चारणस्य उत्तमः अभ्यासः भवति ।

ग) पूर्णवाक्येन उत्तरं लिखत ।

तनुजायाः व्यवसायः कः ?

घ) एषः गद्यांशः कस्मात् पाठात् उद्धृतः ?

**२. शब्दज्ञानम् । (३ तः २)** २

क) प्रश्ननिर्माणं कुरुत।

प्रसादः <u>रसायनशास्त्रस्य</u> छात्रः ।

ख) गद्यांशात् विशेषणं चित्वा लिखत ।

१. ............ अभ्यासः । २. .......... जनाः ।

ग) लकारं लिखत ।

कलाशाखायाः छात्राः संस्कृताध्ययनं <u>कुर्वन्ति</u> ।

**३. जालरेखाचित्रं पूरयत ।** २




**इ) माध्यमभाषया सरलार्थं लिखत । (२ तः १)** ४

| | |
|---|---|
| १. वैखानसः – | (राजानम् अवरुध्य) राजन् ! आश्रममृगोऽयं, न हन्तव्यः, न हन्तव्यः । आशु प्रतिसंहर सायकम्। राज्ञां शस्त्रम् आर्तत्राणाय भवति न तु अनागसि प्रहर्तुम् । |
| दुष्यन्तः – | प्रतिसंहृत एषः सायकः । (यथोक्तं करोति) |
| वैखानसः – | राजन् ! समिदाहरणाय प्रस्थिता वयम् । एष खलु कण्वस्य कुलपतेः अनुमालिनीतीरमाश्रमो दृश्यते। |

| | |
|---|---|
| २. कर्णः – | दृढं प्रीतोऽस्मि भगवन् । एषोऽहं नमस्करोमि । |
| शक्रः – | (आत्मगतम्) किं नु खल्वहं वदामि ? यदि दीर्घायुर्भवेति वदेयम् दीर्घायुर्भवेत्। यदि न वदेयम् मूढ इति मां परिभवति । तस्माद् उभयं परिहृत्य किं नु खलु भाषे ? भवतु, दृष्टम् । (प्रकाशम्) भोः कर्ण, सूर्य इव, चन्द्र इव, हिमवान् इव, सागर इव तिष्ठतु ते यशः । |

**ई) माध्यमभाषया उत्तरं लिखत । (३ तः २)** ४

१. धरित्र्याः उपदेशं मनसि निधाय पृथुवैन्यः किं किम् अकरोत् ?

२. शङ्करेण संन्यासार्थं कथं अनुमतिः लब्धा ?

३. मानवानां जीवनं नदीनां साहाय्येन कथं समृद्धं जातम् ?

## तृतीय: विभाग: – पद्यम्। (२०)

**३) अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** ४

१. तं शब्दमवसुप्तस्तु जटायुरथ **शुश्रुवे** ।
निरैक्षद् रावणं क्षिप्रं वैदेहीं च **ददर्श** सः ।।

ततः पर्वतशृङ्गाभस्तीक्ष्णतुण्डः खगोत्तमः ।
वनस्पतिगतः श्रीमान्**व्याजहार** शुभां गिरम् ।।

निवर्तय मतिं नीचां परदाराभिमर्शनात् ।
न तत्समाचरेद्धीरो परो यद्धि विगर्हयेत् ।।

२. यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः।
तथा चतुर्भिः पुरुषः परीक्ष्यते श्रुतेन शीलेन गुणेन कर्मणा।।

१. पूर्णवाक्येन उत्तरं लिखत । १
जटायुः कां ददर्श ?

२. पद्यांशात् २ विशेषणे चित्वा लिखत । १
.................., .................. जटायुः ।

३. जालरेखाचित्रं पूरयत। २




**आ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** ४

१. प्रथमवयसि पीतं तोयमल्पं स्मरन्तः
शिरसि निहितभारा नारिकेला नराणाम् ।
ददति जलमनल्पास्वादमाजीवितान्तं
न हि कृतमुपकारं साधवो विस्मरन्ति ।।
२. यादृशं वपते बीजं क्षेत्रमासाद्य कर्षकः ।
सुकृते दुष्कृते वाऽपि तादृशं लभते फलम् ।।
३. वैद्यराज नमस्तुभ्यं यमराजसहोदर ।
यमस्तु हरति प्राणान् त्वं तु प्राणान् धनानि च ।।

१. पूर्णवाक्येन उत्तरत्त । १
वैद्यः किं किं हरति ?

२. सन्धिविग्रहं कुरुत । १
क्षेत्रमासाद्य = ................. + ............... ।

३. माध्यमभाषया उत्तरं लिखत । (२ तः १) २
क) नारिकेलाः नराणाम् उपकारं कथं स्मरन्ति ?
ख) मनुष्यः स्वकर्मणः कीदृशं फलं लभते ?

इ) **पद्ये शुद्धे पूर्णे च लिखत । ('क,ख' तः १, 'ग,घ' तः १)** ६

क) यदा ......... व्यपगतः ।। अथवा ख) विद्या ......... पशुः ।। ४

ग) आत्मनो ........ सर्वार्थसाधनम् ।। अथवा घ) राक्षसेभ्यः ......... पाण्डितः ।। २

ई) **अन्वयं पूरयत ।** २

यत्र ............... न अस्ति, तत्र ............. अपि श्लाघ्यः (भवति) । (यथा) निरस्तपादपे ............ एरण्डः आपि .............. ।

उ) **माध्यमभाषया सरलार्थं लिखत । (३ तः २)** ४

१. अद्ययावद्धि ज्ञानाय वृत्तपत्रं पठेत्सदा ।
सर्वविधसुविद्यार्थं वाचनमुपकारकम् ।।

२. एकीभूय यथा सर्वे वर्णा गच्छन्ति शुक्लताम् ।
तथा सम्भूय शंसन्ति धर्मा मानवतागुणम् ।।

३. सर्वधर्मान् परित्यज्य भज मानवतां ध्रुवम् ।
एषोऽभ्युदयकृत् पन्थाः तथा श्रेयस्करोऽपि च ।।

## चतुर्थः विभागः – लेखनकौशलम् । (१५)

**प्र. ४ अ १) विशिष्टविभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत ।** (५ तः ३) ५

क) गम्-गच्छ् (१ प.प.) ख) क्रुध् (४ प.प.)

ग) रक्ष् (१ प.प.) घ) स्निह् (४ प.प.)

च) प्रति + श्रु (५ प.प.)

२. अमरकोषात् शब्दं योजयित्वा वाक्यं पुनर्लिखत । (४ तः २) २

क) कनकं महिलानां प्रियम् ।

ख) तडागे पद्मं विकसति ।

ग) भूमिः स्त्रीरूपं धृत्वा प्रकटिता ।

घ) धेनुः तु वास्तविकी एव ।

आ) **५/७ वाक्यात्मकं निबन्धं लिखत ।** **(३ तः १)** ५

१. मम प्रियं स्थलम् । २. मम प्रियः उत्सवः । ३. मम प्रियः खगः ।

अथवा

**५/७ वाक्यात्मकं संवादं लिखत ।** **(३ तः १)**

१. गृहसंवादः । २. प्रवाससंवादः । ३. दूरवाणीसंवादः ।

## इ) निर्दिष्टां कृतिं कुरुत ।

मञ्जूषातः उचितशब्दान् चित्वा ५-६ वाक्यात्मकं चित्रवर्णनं कुरुत । ५




[उड्डयते, अस्ति, स्नाति, वहति, क्षालयति, नयति, स्नापयति, दर्शयति, पिबति, उदयति.]

अथवा

## इ) संस्कृतानुवादं कुरूत । (८ तः ५) ५

१. कालिदास नावाचा कवी होता.

कालिदास नाम का कवी था ।

There was a poet named Kalidas

२. आम्ही दोघे मैदानात खेळतो.

हम दोनों मैदान में खेलते हैं ।

We both play in the garden.

३. पशू अरण्यात राहतात.

पशू वन में रहते हैं ।

Animals live in the forest.

४. हिमालय पर्वतांचा राजा आहे.

हिमालय पर्वतों का राजा हैं ।

Himalaya is the king of mountains.

५. महेश सरस्वतीला नमस्कार करतो.

महेश सरस्वती को नमन करता हैं ।

Mahesh salutes Saraswati.

६. सकाळी ध्वजवंदन झाले.

सुबह ध्वजवंदन हुआ ।

Flag hosting was held in the morning.

७. तू गावाला केव्हा जाशील ?

तुम गाँव कब जाओगे ?

When will you go to village ?

८. श्रावणी सकाळी सहा वाजता उठते.

श्रावणी सुबह छह बज़े उठती हैं ।

Shravani wakes up at 6 O'clock in the morning.

## पञ्चमः विभागः – भाषाभ्यासः । (२०)

५) अ) **तालिकापूर्तिं कुरुत ।** ८

१. नामतालिका । (६ तः ४) २

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| .................. | विद्यावन्तौ | ................ | द्वितीया |
| .................. | ................ | भानुभिः | तृतीया |
| दिशि | ................ | ................ | सप्तमी |

२. सर्वनामतालिका । (६ तः ४) २

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| .................. | ................ | काभ्यः | चतुर्थी |
| अस्मात् | ................ | ................ | पञ्चमी |
| ................ | भवन्तौ | ................ | प्रथमा |

३. क्रियापदतालिका । (६ तः ४) २

| लकाराः | एकवचनम् | द्विवचनम् | बहुवचनम् | पुरुषः |
|---|---|---|---|---|
| लट् | .............. | लभेते | .............. | प्रथमः |
| लृट् | गमिष्यसि | .............. | .............. | मध्यमः |
| विधिलिङ् | .............. | .............. | क्षिपेम | उत्तमः |

४. धातुसाधित-विशेषण-तालिका । (६ तः ४) २

| धातुः | क्त | क्तवतु | कृत्याः | शतृ । शानच् |
|---|---|---|---|---|
| पठ् (१ प.प.) | .............. | पठितवान् | .......... | पठन् |
| भाष् (१ आ.प.) | भाषितः | .............. | भाष्यः | .............. |
| रच् (१० उ.प.) | .............. | रचितवान् | .......... | रचयन्/ रचयमानः |

आ) **निर्दिष्टाः कृतीः कुरुत ।** (५ तः ४) १२

१. योग्यं रूपं लिखित्वा रिक्तस्थानपूर्तिं कुरुत । (५ तः ३) ३

क) रात्रौ .............. (१२) वादने सर्कसक्रीडा प्रारब्धा । (सङ्ख्यावाचकम्)

ख) भवने मम गृहं ........... (७) तले वर्तते । (क्रमवाचकम्)

ग) अहं .............. (१०) सुवर्णनाणकानि यच्छामि । (सङ्ख्यावाचकम्)

घ) तेन .......... (३) प्रयोगः कृतः । (आवृत्तिवाचकम्)

च) अहं दिनस्य ............ (२) भोजनं करोमि । (आवृत्तिवाचकम्)

२. समस्तपदानां तालिकापूर्तिं कुरुत । (५ तः ३) ३

| | समस्तपदम् | विग्रहः | समासनाम |
|---|---|---|---|
| क) | विदेशगमनम् | ...... । | द्वितीया-तत्पुरुषः । |
| ख) | ...... | महत् काव्यम् । | कर्मधारयः । |
| ग) | पूजार्थम् | पूजायै इदम् । | ...... । |
| घ) | अपरिचितः | ...... । | नञ् तत्पुरुषः । |
| च) | ...... | आयते लोचने यस्याः सा । | बहुव्रीहिः । |

३. समानार्थकशब्दान्/विरुद्धार्थकशब्दान् लिखत । (५ तः ३) ३

क) धनुः = ............ । ख) समानः × ............।

ग) दन्ताः = ............ । घ) विदेशः × ............।

च) पण्डितः = .......... ।

४. सूचनानुसारं कृतीः कुरुत । (५ तः ३) ३

क) छात्रेण पाठः पठितः । (वाच्यपरिवर्तनं कुरुत ।)

ख) अर्णवः जपाकुसुमं गृहीत्वा प्रविशति । (पूर्वकालवाचकं निष्कास्य वाक्यं लिखत ।)

ग) त्वं किम् इच्छसि ? ('त्वम्' स्थाने 'भवान्' योजयत ।)

घ) सीता वनस्पतिगतं गृध्रं ददर्श । (लङ्लकारे परिवर्तयत ।)

च) अन्धकारः नश्यति । (सूर्यः) (णिजन्तं कुरुत ।)

५. वाक्यं शुद्धं कुरुत । (५ तः ३) ३

क) गणेशं नमः ।

ख) विद्यालयस्य परितः वृक्षाः सन्ति ।

ग) शर्करा मधुरः वर्तते ।

घ) प्रभाते छात्राः प्रार्थनां गायति ।

च) तौ आसन्दे उपविशति ।

## षष्ठः विभागः – अपठितम् । (८)

**प्र. ६ अ) गद्यांशं पठित्वा कृतीः कुरुत । (६ तः ४)** ४

एकदा रात्रौ बालः श्रीरामः आकाशे चन्द्रं प्रेक्षते । सः कौसल्यां भाषते–'अम्ब, मह्यम् एतं चन्द्रं यच्छ' इति । तदा कौसल्या भणति–'वत्स, एषः चन्द्रः गगने वर्तते । त्वं कथं तमधिगच्छसि ?' ततः बालः श्रीरामः 'अहमेनं चन्द्रं अभिलषामि, प्रयच्छ तं मे' इति जननीं पुनःपुनः वदति क्रन्दति च । तदा सारथिः सुमन्त्रः तत्र आगच्छति । सः श्रीरामाय दर्पणमेकं दत्त्वा भणति–''बाल राम, एषः तव हस्ते चन्द्रः, पश्य एनम्'' इति । तदा बालः श्रीरामः दर्पणे चन्द्रं पश्यति । तत्क्षणं सः रोदनात् विरमति ।

१. पूर्णवाक्येन उत्तरत । १

बालः श्रीरामः दर्पणे किं पश्यति ?

२. प्रातिपदिकं लिखत । १

१. रात्रौ २. सः

३. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत । १

श्रीरामः आकाशे सूर्यं प्रेक्षते ।

४. माध्यमभाषया सरलार्थं लिखत । १

तत्क्षणं सः रोदनात् विरमति ।

५. गद्यांशात् १ अव्ययं चित्वा लिखत । १

६. कारकपरिचयं कुरुत । १

चन्द्रः गगने वर्तते ।

**आ)–१. पद्यांशं पठित्वा निर्दिष्टे कृती कुरुत ।** ४

गुणाः सर्वत्र पूज्यन्ते पितृवंशो निरर्थकः ।
वासुदेवं नमस्यन्ति वसुदेवं न मानवाः ।।

१. पूर्णवाक्येन उत्तरत । (२ तः १) १

१. के सर्वत्र पूज्यन्ते ?

२. मानवाः कं नमस्यन्ति ?

२. समानार्थकं शब्दं लिखत । १

मानवः = ............... ।

**२. पद्यांशं पठित्वा जालरेखाचित्रं पूरयत ।** २

| |
|---|
| अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।<br>चत्वारि तस्य वर्धन्ते आयुः विद्या यशः बलम् ॥ |




***